# चतुर्थोऽङ्कः ।

(ततः प्रविशति व्योमयानेन गन्धर्वयुग्मम् ।)

(प्रविश्य ।)

**एकः** - वयस्य रत्नमालिँस्त्वं कुत आगतः ।

**रत्नमाली** - सखे पद्ममालिन् वृन्दारकवृन्दामन्दवन्दितचरणारविन्दद्वन्द्वस्य महेन्द्रस्य सदःप्रदेशात् ।

**पद्ममाली** - सखेऽजस्रमुर्वशीवदनसरससरसिजस्रुतगीतिमरन्दरसरसनव्यसनवत्तया विशेषतो यथार्थनिर्लिंपेन्द्रस्य कार्यान्तरप्रवृत्तिं सूचयति तेऽस्मिन् प्रदेशे प्रवृत्तिः ।

**रत्नमाली** - वयस्यैवमेवैतत् ।

**पद्ममाली** - तर्हि कारणाभिज्ञोऽसि चेद्वर्णय ।

**रत्नमाली** - श्रुतं हि मया बार्हस्पत्यस्य कचस्य मुखाद्यन्निखिललेखलेखोल्लेखने निष्खलीनः खलः खलु हिरण्यकशिपुः क्वापि निलीनो भ्रातृशोकेन विनष्टो वेति तत्तदनुरूपकार्ये प्रवृत्तिरिति तर्कयामि स्वामिनः ।

**पद्ममाली** - (साकूतस्मितम् । सशिरःकम्पम् ।) सखे सम्भाव्यते तथैव ।

**रत्नमाली** - सखे त्वं पुनः कुतः प्रदेशात् प्राप्तः ।

**पद्ममाली** - (सहर्षम् ।) सखे सखेदत्वखननोन्मुखप्रदेशाददतिशोभासौख्यमनुभूयागतोऽस्मि ।

**रत्नमाली** - (सकौतुकम् ।) सखे कस्येति पृच्छामि ।

**पद्ममाली** - (सानन्दम् ।) शृणु तस्य किल धार्तराष्ट्रैरर्जुनादिभिर्द्विजसङ्घैश्च सेव्यमानतया द्रोणमनुकुर्वतो मन्दरस्याद्रिमहेन्द्रस्य सुमनोऽमृतरत्नोरगशालितया स्वर्गस्य बिलस्वर्गस्य च प्राप्तसाम्याया अपि जीववैरोचनबहलतया तदधिकाया अधित्यकाया उपत्यकायाश्च ।

**रत्नमाली** - किं तत्रत्यमतिमात्रकामनीयकं वृत्तं च ।

**पद्ममाली** - (सोत्साहम् ।) वयस्य शृणु । यः किल ।

**माणिक्यमौक्तिकसुविद्रुमपुष्पराग-**
**गारुत्मतेन्द्रमणिवज्रविदूररत्नैः ।।**
**गोमेदकाञ्चनभरैः शबलः पृथिव्या**
**निष्कश्रियं नु विदधाति महीध्रवर्य्यः ।।१।।**

किञ्च ।

**नानानिर्झरसञ्झरज्जलकणव्याप्तच्छदाः पक्षिणो**
**यत्राभान्ति नु राजहंसनिचये सेर्ष्यत्वमालम्ब्यते ।।**
**दृप्ताः पक्षजनिव्रणेभ्य इति तान्निर्जीर्णकान् सङ्घशो**
**यत्नेनापि समुद्गिरन्ति नियतं मुक्तामणीन् भक्षितान् ।।२।।**

**रत्नमाली** - (सश्लाघम् ।) अहो कमनीयता शिखरिशेखरस्य । (सशिरःकम्पम् ।) अहो वर्णनवैदग्ध्यं वयस्यस्य ।

**पद्ममाली** - सखे शृणु । क्वचिच्चानिशम् ।

**देवोरगयक्षाणां कान्तानामप्सरोजनानां च ।।**
**वदनामलशरदिन्दूच्चयदर्शनतो द्रवन्ति चन्द्रशिलाः ।।३।।**

**तासां क्वचिन्मकरिकाकृतिशेषसान्द्र-**
**काश्मीरचन्दनरसैः परिकल्पितानि ।।**
**चित्राणि राजतशिलातलसंस्थितानि**
**निष्टप्तहाटकतुलां दधति स्म रम्याम् ।।४।।**

**रत्नमाली** - (सानन्दम् ।) अहो नेत्रानन्दः ।

**पद्ममाली** - (सानन्दम् ।)

**दरीवदनसन्निधौ सततनिष्पतन्निर्झरैः**
**सुगैरिकविमिश्रितैर्ननु गिरीन्द्रवर्यः क्वचित् ।।**
**विभाति कृतचर्वणः सुभगवीटिकाया रसं**
**समुद्गिरति यत्नतो धृतविलासिसाम्यः सदा ।।५।।**

(पुनः सानन्दम् ।) क्वचित्प्रदेशे ।

**रमणीजनकृतमृगमदचित्राणि स्वर्णभूमिकायां वै ।।**
**तद्देहद्युतिभूम्यां शृङ्गारस्याङ्कुरा इवाभान्ति ।।६।।**

**रत्नमाली** - (साह्लादम् ।) अहो निवाससौख्यं सूचयति ते वर्णनपिशुनः ।

**पद्ममाली** -

**क्वचन महोद्धतकरिवरनिकरं दृष्ट्वाथ बृंहितं श्रुत्वा ।।**
**सजलाम्बुदतद्गर्जितविचित्तचित्ता नदन्ति किल शिखिनः ।।७।।**

(पुनः सानन्दम् ।) क्वचिच्च परस्परम् ।

**परिकम्पिताः समीरैः शिशिरैः सरलै रसालभूमिरुहाः ।।**
**पल्लवरसनामधुरं लिहन्त इव मञ्जरीरसं भान्ति ।।८।।**

यद्वा ।

**मरुदान्दोलिततरवः शाखाहस्ताः सुपल्लवाङ्गुलिकाः ।।**
**तत्रत्याङ्गणरङ्गे लास्यैः संरञ्जयन्ति तत्रत्यान् ।।९।।**

**रत्नमाली** - (सतोषम् ।) अहो युक्तमिदं श्रावणदर्शनं सुखयति मन्मानसमतितराम् ।

**पद्ममाली** - (पुनः सानन्दम् ।) सखे शृणु त्वम् ।

**पुष्प्यत्पुष्पपरम्पराप्रकलिता नीपाः प्रभान्ति स्फुटं**
**धृत्वा कन्दुकवृन्दमिन्दुनिचयश्लाघ्यं मिलिन्दश्रितम् ।।**
**तत्रत्यातिविहारतत्परजनान् सम्भावयन्तीति तन् -**
**मुख्यामोदविनिर्जितास्तरुवरास्तत्क्रीडनायानिशम् ।।१०।।**

(पुनः साह्लादम् ।) अयि वयस्य किं वर्णयामि तत्रत्यसुन्दरीजनानां सौन्दर्यम् । शृणु ।

**स्वाधिकसौरभमार्द्दववर्णश्रीसंश्रिता वरारोहाः ।।**
**दृष्ट्वा कण्टकितः संस्तिष्ठति केतकसमूह इह सततम् ।।११।।**

**रत्नमाली** - (सकौतुकम् ।) अहो अधरीकृतमस्मदीयपदम् ।

**पद्ममाली** - सखे किं वर्णयाम्येकया रसनया । शृणु तावत् ।

**दलकुलनिबिडैस्तरुभिः सफलैः सामोदनिर्भरैर्नित्यम् ।।**
**घर्मक्षुद्दौर्गन्ध्यप्रभवं दुःखं न बाधते यत्र ।।१२।।**

किञ्च ।

**मधुररससौरभशीतलनिर्मलसलिलैश्च काञ्चनैः कमलैः ।।**
**अलिकुलझङ्कृतिमुखरैर्बहुझषसञ्चारचञ्चलैस्तत्र ।।१३।।**

**तन्मकरन्दपरागैर्मणिगणघटितैर्मनोज्ञसोपानैः ।।**
**रुचिरतरा वाप्यस्ताः सुचिरभृतं तापमपनुदन्ति द्राक् ।।१४।।**

किञ्च ।

**क्वचिदिन्द्रनीलमणिमेदिनीतले तत्प्रतिफुल्लहल्लककुलं विराजते ।।**
**रसमुख्यमुकुरमहीतले स्फुटं प्रतिबिम्बितानि सुदृशां मुखानि किम् ।।१५।।**

**रत्नमाली** - (सानन्दम् । सश्लाघम् ।) अहो भगवतो विधेर्विविधविधानवैदग्ध्यं तत्रैव विजृम्भते ।

**पद्ममाली** - (सौत्सुक्यम् ।) सखे तत्रत्यसौन्दर्यसीधुनयनचषकाभ्यां निपीतं मुहुर्मुहुर्मुखरयति मां तच्छृणु ।

**अतिविकसन्ति निरन्तरपाटलपटलानि भान्ति नन्वेवम् ।।**
**कान्तामुखनिर्मित्यै विधिरचितानि च कपोलफलकानि ।।१६।।**

**यद्वा तत्रत्यानां कान्तानां तां कपोलसुषमां वै ।।**
**पश्यन्मोदात्सततं कण्टकितः पाटलीयसमुदायः ।।१७।।**

(पुनः सानन्दम् ।) क्वचिच्च ।

**हाटकमण्डपिकोपरि वितता व्रततिः प्रदृश्यतेऽजस्रम् ।।**
**रवितरुदारूपघ्ने रतिकुसुमायुधरुचेः प्रसारः किम् ।।१८।।**

क्वचिच्च तत्रत्यानाम् ।

**क्वणत्किङ्किणीकङ्कणक्वाणकान्तं**
**मिलत्कीचकानीचशब्दं नितातम् ।।**

**अनङ्गस्य साङ्गत्वहेतुर्हि गानं**
**सखे येऽङ्गनानां सुखस्योन्निदानम् ।।१९।।**

**रत्नमाली** - (सशिरःकम्पम् ।) सखे बह्वभ्यस्तेऽपि सङ्गीतके तच्छ्रवणेनोत्कण्ठते चेतस्तद्वृद्धये ।

**पद्ममाली** - वयस्यैवमेवैतत् । यतः ।

**गानं ज्ञानं च भक्तिश्च श्रवणेन विवर्द्धते ।।**
**उत्कस्य यतमानस्य पुरुषस्य विशेषतः ।।२०।।**

**रत्नमाली** - सखे सत्यमुपदिष्टं भवता ।

**पद्ममाली** - (सानन्दम् । किञ्चिन्नेत्रे निमील्य श्रवणसौख्यस्मरणमभिनीय ।) अयि वयस्य किं ब्रवीमि ।

**तानोत्तरङ्गतरलः श्रुतिशफरीमूर्च्छनाकमठहृद्यः ।।**
**सङ्गीतामृतवार्द्धिः स्मृत इह विवशीकरोति मच्चेतः ।।२१।।**

(सपरितोषम् ।) साधु वयस्य साधु त्वमेवैतादृशः कृतज्ञः । यतः ।

**सङ्गीतस्य मृगाक्षीणां कटाक्षस्य विशेषतः ।।**
**कवितायाश्च माधुर्यं रसिको वेत्ति तत्परः ।।२२।।**

**पद्ममाली** - (किञ्चिद्विहस्य ।) सखे एवमेवैतत् । शृणु तावदन्यत् ।

**पल्लवकरचरणाधरफलवक्षोजप्रसूनमालाभिः ।।**
**भ्राम्यद्भृङ्गविलोचनगुच्छवतंसप्रमोदकान्ताभिः ।।२३।।**

**वल्लीमतल्लिकाभिः संश्लिष्टाः शाखिनो वरा भान्ति ।।**
**खगकुलमञ्जुलशब्दैः कुर्वन्त्यालापमुच्चकैः किं ते ।।२४।।**

क्वचिच्च ।

**क्रीडातत्परकान्ताश्लिष्टाः कुसुमप्रवर्षिणो वृक्षाः ।।**
**राजन्ते तन्मोदादश्रुप्रावर्षिणो यथा रसिकाः ।।२५।।**

किञ्च ।

**इन्दिन्दिराः पतन्तस्तत्सुममकरन्दलोलुपा भान्ति ।।**
**कामाम्बुदसंवृष्टाः करकाः शृङ्गारवारिणः किं ते ।।२६।।**

अन्यच्च ।

**पुंस्कोकिलपिकशुकमुखपत्त्रिकुलानां रुतैः स्तुतैरनिशम् ।।**
**सविनयसत्कृतिवाक्यान्यद्रिवरः प्रब्रवीति ननु पथिकान् ।।२७।।**

तत्र स्वविरोधितया किल ।

**गुहागतः केसरिणां समूहस् -**
**तपोधनानां च विभाति रुद्धः ।।**
**शृङ्गारपृथ्वीशवरेण रोषाच् -**
**छान्तश्च रौद्रः किमसौ रसो वै ।।२८।।**

किञ्च ।

**प्रबलतरै रत्नकरैर्न्यक्कृतकृत्स्नान्धकारसङ्घस्तु ।।**
**कन्दरमन्दिरशरणो भूत्वा निश्चिन्तताम गाद्यत्र ।।२९।।**

अन्यच्च ।

**रचितैर्महेन्द्रनीलैर्वज्रैर्माणिक्यसङ्घकैर्मार्गैः ।।**
**भाति गिरीन्द्रः सरितां त्रिभिः प्रवाहैः प्रयाग इव मूर्त्तः ।।३०।।**

**रत्नमाली** - (सानन्दम् ।) अहो वर्णनामृतं श्रोत्रचषकाभ्यां मुहुः पिबदपि न तृप्यति चेतः ।

**पद्ममाली** - सखे एवमेवैतत् । एकया रसनयाहमपि न वक्तुमीशेऽधुना तावदाकर्णयोपत्यकाकामनीयकम् ।

**मृदुतरसुखकरमणिगणचूर्णैः पूर्णा क्वचिद्विभातीयम् ।।**
**तादृग्विचित्रकशिपूच्चयसंस्तीर्णविलासभूमिरिव ।।३१।।**

**मिलन्मृगपरम्पराचलनसूर्यजातोल्ललत्-**
**प्रवाहपरिपूरिता विविधपल्वलैर्लालिता ।।**

क्वचिद्धरितबल्वजैः सुखकरैः प्रपूर्णा भृशं
द्वयाय सततं दृशोर्दिशति शीततां पश्यताम् ।।३२।।

किञ्च ।

इन्दीवरशतपत्रैः स्वर्णार्णोजैः प्रफुल्लकल्हारैः ।।
हल्लककुलैर्मिलिन्दैर्नानावर्णैर्झषैर्विमलसलिलैः ।।३३।।

तन्मकरन्दपरागैरामोदैर्मोददानि लोकानाम् ।।
नानासरांसि सततं मणिगणखचितानि पत्त्रिरम्याणि ।।३४।।

अवगाहनाभिलाषं सनत्पिपासां वितन्वन्ति ।।
सुखयन्ति यत्र वसतो वासवसौख्यं प्रपन्नाश्च ।।३५।।

किं बहुना ।

विधिरिव हंसैः सेव्यो द्विजवृन्दैः कञ्जसम्पदा युक्तः ।।
सरसीनिचयो विलसति समरीचिः सर्वतोमुखो यत्र ।।३६।।

यद्यपि विधिसदृशोऽयं सुनीरजाः श्रुतिविहीन इति चित्रम् ।।
युक्तं निलिम्पनिचयैर्युक्तो मुक्ताश्रयो नित्यम् ।।३७।।

**रत्नमाली** - (सशिरःकम्पम् ।) अयि सखे त्वद्वागमृतपानाय तत्सरःसमूहस्नानाय च दोलायते चेतः । तदपि पायय तावदन्यदपि श्रवणामृतम् ।

**पद्ममाली** - (साह्लादम् ।) शृणु सखेऽन्यदपि कामनीयकं तत्रत्यम् ।

अनभ्राभ्रैर्मृगैः शाखामृगैर्मृग्यं पथि स्थितैः ।।
भाति यत्रामृतैर्हृद्यमुद्यानं मृदुमृत्स्नया ।।३८।।

ननु सखे ।

गुणयुग्रसयुङ्क्लिष्टं काले लभ्यं समुन्नतं श्लाघ्यम् ।।
वर्णालङ्कृतिघटितं काव्यसदृक्षं रसालफलवृन्दम् ।।३९।।

**रत्नमाली** - सखे एवमेवैतत् ।

**पद्ममाली** - किञ्च ।

चामीकरमणिनिकरप्रसृमरकरभरविचित्रिताभ्यां या ।।
उभयतटाभ्यां रम्या प्रवहति विमला सरिद्वरा यत्र ।।४०।।

**तज्जलजलजमहीरुहसंश्लिष्टैर्मारुतैरुतैर्वयसाम् ॥**
**प्रमदाः प्रमदासहिताः सुखिनो विहरन्ति निर्जरा नित्यम् ॥४१॥**

अन्यच्च ।

**स्तम्बेरमकरनिकरधारायन्त्राद्विनिःसृतैः सलिलैः ॥**
**वर्षावसरसुशोभा विपुला यत्रोष्णकालेऽपि वै ॥४२॥**

**मृदुतरसुखकरतारानिकरप्रतिमाच्छरेणुभरभरिते ॥**
**रमणीयश्वापदगणचरणं यत्र प्रतीरके सुखदम् ॥४३॥**

**द्रुमसुमपरागपटलैर्लोलद्रोलम्बडम्बरैर्नित्यम् ॥**
**दुर्दिनमपि ते सुदिनं मन्यन्ते कामिनः सुखाद्यत्र ॥४४॥**

**रत्नमाली** - (सहर्षम् । सशिरःकम्पम् ।) अहो सौष्ठवातिरेकस्तत्प्रदेशस्य । यत्स्वयं सधरोऽपि विशेषतोऽधरीकरोति नन्दनवनरामणीयकम् ।

**पद्ममाली** - सखे एवमेवैतत् । एकया रसनया कियद्वर्णयामि तेन दिङ्मात्रं प्रदर्शितं परं तत्रत्यं प्रवृत्तं शृणु ।

**रत्नमाली** - (सकुतूहलम् ।) वयस्य वर्णय वर्णय ।

**पद्ममाली** -

**तदेकदेशे स च दानवेन्द्रो**
**वल्मीकवीरुत्तृणकीचकाद्यैः ॥**
**संछन्नदेहः कुरुते तपस्यां**
**सुरासुरश्लाघ्यतमां विनिन्द्यः ॥४५॥**

**तत्तपोऽग्निमहाधूमधूम्रं तत्पर्वतादिकम् ॥**
**निःश्रीकमभवत्सर्वमुपरक्तो यथा रविः ॥४६॥**

(सविषादम् ।) किं बहुना क्रमेण त्रिलोक्यपि तादृग्भवितेति ज्ञायते ।

**रत्नमाली** - (सविषादम् ।) सखे महाननर्थः समजनि । न जानेऽस्य विषवृक्षाङ्कुरस्य कीदृशः परिणामो भविता ।

**पद्ममाली** - वयस्यालं विचारप्रचारेण यादृशीश्वरेच्छा तादृशमेव भविता ।

(आकाशे घण्टाध्वनिः ।)

**पद्ममाली** - (आकाशे दत्तदृष्टिः ।) अयि वयस्य घण्टाटङ्कारशब्दिताकाशं मणिगणकिरणकिर्मीरितगगनाङ्गणं किमेतदायाति ।

**रत्नमाली** - (निपुणं विलोक्य ।) अयि वयस्य ज्ञातः ज्ञातः तुम्बरुपुत्रः कुन्ददन्त इत एवाभिवर्त्तते ।

(ततः प्रविशति विमानेन कुन्ददन्तः ।)

(प्रविश्य ।)

**कुन्ददन्तः** - (तौ प्रति ।) अयि सखायौ अनामयं पृच्छामि ।

**उभौ** - भवद्दर्शनेन विशेषतः परं कुतः प्रदेशादागमनं वयस्यस्य ।

**कुन्ददन्तः** - सत्यलोकादागतोऽस्मि ।

**रत्नमाली** - कीदृशस्तत्रत्य उदन्तः ।

**कुन्ददन्तः** - अद्य किल शतमखप्रमुखैर्नानोत्पातशङ्काशबलाशयैः स्तोत्रसन्तुष्टः परमेष्ठी सम्पृष्टः किमेतदरिष्टस्य कारणमिति ।

**उभौ** - ततः ततः ।

**कुन्ददन्तः** - ततश्च तेनोक्तम् ।

**मत्पुत्राः सनकादयः किल पुरा श्रीमत्प्रभोर्दर्शने**
**सोत्साहा अगमन् विकुण्ठनिलयं तद्द्वारदेशे तदा ॥**
**द्वाःस्थाभ्यां प्रतिरुद्धशीघ्रगतयः शेपुस्ततस्तौ द्रुतं**
**श्रीशेक्षावचनामृतातिसुखिता लोकान्तरं ते गताः ॥४७॥**

ततश्च कृपाकूपारेण प्रभुणा तौ जयविजयावेवमाज्ञप्तौ

**जन्मत्रये मयि गतौ वैरबुद्धिं मया हतौ ॥**
**पुनर्वैकुण्ठनिलयं भवन्तावागमिष्यतः ॥४८॥**

ततश्च तल्लोकवासिवदनाद्धाहाशब्द इव तौ तल्लोकान्निपेततुः । तावेव हिरण्याक्षहिरण्यकशिपुनामानौ सञ्जातौ तयोर्मध्ये हिरण्याक्षस्तु वराहवपुरावहता विभुना निहतः ।

**तज्ज्यायाँश्च महर्षिवर्यहृदयेष्वाश्चर्यचर्यां भृशं**
**सन्तन्वंस्तनुते सुदुष्करतरां घोरां तपस्यां खलः ।।**
**श्रीमन्मन्दरपुण्यसानुविषये लब्धुं वरान् दुर्लभान्**
**भ्रातुः स्वस्य कनीयसो ह्यपचितिं कर्त्तुं कृतान्तोपमः ।।४९।।**

इति ।

**उभौ** - ततः ततः ।

**कुन्ददन्तः** - ततस्तेनोक्तम् ।

**तदेव कारणं देवा अरिष्टस्य न चापरम् ।।**
**वारणं तस्य तस्या वै वारणं वारणं ततः ।।५०।।**

इति । तदन्तरेऽहं ततः प्रचलितः पश्चात्किं तैर्व्यवसितं तन्न जाने ।

**पद्ममाली** - (सस्मितम् ।) अयि सखायौ साम्प्रतमेतत् ।

**अघौघवर्द्धकं दीर्घं त्रिमुखं भयदं सताम् ।।**
**गङ्गाम्भ इव संवृत्तं वृत्तं दैत्यजनेशितुः ।।५१।।**

**उभौ** - (सस्मितम् ।) एवमेवैतत् ।

(नेपथ्ये महान्कलकलः ।)

भो भो धर्मज्ञा आर्याः गुर्विणीं साम्प्रतमनाथां मामबलां रक्षत रक्षत ।

**कुन्ददन्तः** - (साश्चर्यम् ।) किमिदं स्त्रियाः परिदेवनमिव श्रूयते । (नेपथ्याभिमुखमवलोक्य ।) हन्त हन्त देवराजस्यापि प्राकृतानामिव सुधर्मेतरप्रवृत्तिः ।

**रत्नमाली** - (निपुणं निरीक्ष्य ।) अहह एवमेवैतत् ।

**यद्भ्रूभङ्गविजृम्भमात्रत इतास्त्रस्ताः समस्ताः पुरा**
**त्यक्त्वा स्वस्त्रिदशा दिशोदिशमहो लीना महेन्द्रादयः ।।**
**तत्कान्तामथ गुर्विणीं पतिमतीं पक्षोज्झितां साम्प्रतं**
**क्रुद्धो हन्ति महेन्द्र एष पविना दैवी विचित्रा गतिः ।।५२।।**

**पद्ममाली** - तन्नोचितमस्माकं स्वामिनोऽनुचितकर्मनिरीक्षणम् ।

(इति निष्क्रान्ताः ।)

(ततः प्रविशति तादृङ्महेन्द्रः कयाधुश्च ।)

(प्रविश्य ।)

**कयाधुः** - (सत्रासं "**भो भो धर्मज्ञा**" इत्यादि पठति ।)

**महेन्द्रः** - (सक्रोधम् ।)

**पापे पापाङ्कुरं त्यक्त्वा जठरात्साम्प्रतं मम ।।**
**वज्रेण निहताऽपापा भवित्री त्वं निशाचरि ।।५३।।**

(इति वज्रप्रहारोद्योगं नाटयति ।)

(नेपथ्ये वीणाध्वनिः ।)

**महेन्द्रः** - (श्रुत्वा सविषादम् । नेपथ्याभिमुखमवलोक्य ।) कथं हिंसाविहिंसको देवर्षिः । महान्कार्यविध्वंसः किल समुपस्थितः । (स्वगतम् ।) यः किल प्राचीनबर्हिषं

**वेदोदितेन विधिना विशसन्तं पशूनपि ।।**
**न्यवारयत् स किं नार्य्याः पापमेतत्सहिष्यते ।।५४।।**

(ततः प्रविशति देवर्षिः ।)

(प्रविश्य ।)

**देवर्षिः** - विजयतां देवेन्द्रः ।

**महेन्द्रः** - (प्रणम्य सलज्जस्तूष्णीं तिष्ठति ।)

**कयाधुः** - (ससाध्वसं सकम्पम् । प्रणम्य । "**भो भो धर्मज्ञा**" इत्यादि पुनः पठति ।)

**देवर्षिः** - (सानुकम्पम् ।)

**भो भोस्त्वं त्रिदशेश्वरोऽसि सबलो वज्रं सुघोरं करे**
**वृत्रत्रासविनाशनेऽतिनिपुणं नित्यं सतां रक्षणे ।।**

**स त्वं तेन हि गुर्विणीं पतिसुहृद्धीनां सुदीनां स्त्रियं**
**हन्तुं नार्हसि दीनवत्सलतया श्लाघ्योऽसि लोके यतः ।।५५।।**

**महेन्द्रः** - (किञ्चित्सक्रोधलज्जम् ।) भगवन् ।

**नोच्छेद्याः शिशवस्तथाप्यहिशिशूँश्छिन्दन्ति लोकाः स्त्रियोऽ-**
**प्यछेद्या विशसन्ति यत्नभरतो व्याघ्रीस्तथा च द्रुमाः ।।**

**नोत्पाट्या अपि पाटयन्ति सविषाँस्ताँस्तद्वदेषा ध्रुवं**
**वध्या लोकभयाङ्कुरस्य पृथिवीलोकत्रयीश्रेयसे ।।५६।।**

**नारदः** - (सानुकम्पास्मितम् ।) अयि देवराज राजनीतिपरेण भवता तथ्यमेव कथितम् । परम् ।

**नैतस्या जठरेऽस्ति लोकभयदो दैत्येन्द्रतुल्यः खलः**
**किन्तु श्रीशसमर्चकेषु सततं शंस्यस्सतां सम्मतः ।।**

**नाश्चर्यं विषकारणे जलनिधौ दृष्टः सुधासम्भवस्-**
**तस्माद्दैत्यपरिग्रहोऽयमधुना त्याज्यो मदाज्ञावशात् ।।५७।।**

किञ्च ।

**लोकघोरभयाङ्कुरं मन्यसेऽयं सुरेश्वर ।।**
**स एव नाशने तस्य भविता हेतुरर्भकः ।।५८।।**

**महेन्द्रः** - (किञ्चित्सहर्षम् । सविनयम् ।)

**मातृष्वसुः शुभतरं प्रबलं च गर्भं**
**यो दारयन्करुणया रहितः स चाहम् ।।**

**वज्रं तदेव निशितं स च शत्रुपक्षः**
**क्षिप्रं तथाप्यथ जहामि भवन्निदेशात् ।।५९।।**

**नारदः** - (सपरितोषम् ।) अयि देवेन्द्र धर्मविनयसुधोदधिमन्दरधराधरस्य तवोचिततरमेतत् । यतः ।

**धर्मेण विनयेनापि तत्याजासून् सुदुस्त्यजान् ।।**
**दधीचिः प्रत्यभिज्ञातु तस्य वज्रं करे तव ।।६०।।**

**महेन्द्रः** - (सविनयम् अञ्जलिं बद्ध्वा ।) भगवन् देवर्षे दातुमर्हस्यनुज्ञां देवलोकगमनाय । (इति निष्क्रान्तः ।)

**कयाधुः** - (सास्रं सकम्पम् ।) (देवर्षेः पादयोर्निपतति ।) ("**भो भो धर्मज्ञा**" इत्यादि पुनः पठति ।)

**नारदः** - (सानुकम्पम् ।) वत्से उत्तिष्ठ उत्तिष्ठ । अपगतसाध्वसासि । यतः

**साध्वसध्वंसने धीरो गोवर्द्धनधरः स्वयम् ।।**
**तत्पादाब्जरतो गर्भे धृतस्तस्माद्भयं कुतः ।।६१।।**

**कयाधुः** - (उत्थाय ।) (सास्रं सविनयमञ्जलिं बद्ध्वा ।) भो भगवन् भवदभयदानप्रभावेण भग्नभयास्मि संवृत्ता । तथापि अधुना सर्वास्वपि दिक्षु किमपि नाधारभूतं पश्यामि ।

**नारदः** - (सानुकम्पास्मितम् ।) अयि वत्से त्वमेवं चिन्ताचयक्ष्वेडाकूपारप्लवनं मा कृथा मदभयदानतरणिं समारुह्य धैर्यप्रतीरमवलम्बस्व ।

**कयाधुः** - भगवन् हितमेवोपदिष्टं कृपालुना भवता परं दुस्तरः खलु व्यसनार्णवो हतभाग्यानामस्मादृशानाम् । यतः । आत्मीयं पदमपि निधातुं साम्प्रतं पृथ्वीं न प्रपश्यामि ।

**नारदः** - (सानुकम्पम् ।) वत्से मैवं व्यथिष्ठाः । एहि तावन्मदाश्रमपदसेवनेन वत्सपदसदृक्षं कुरु व्यसनवाराशिम् ।

**कयाधुः** - यथा गुरुचरणानामाज्ञा ।

(इति निष्क्रान्तौ ।)

**।। इति श्रीनृसिंहविजयनाम्नि नाटके चतुर्थोऽङ्कः ।।**